# MIDNAPORE COLLEGE (AUTONOMOUS)

## RAJA BAZAR, MIDNAPORE – 721101

**Description of Study Material:**

| | |
|---|---|
| Department | PG Dept. of Sanskrit |
| Subject | Sanskrit |
| Year & Semester | 2nd Year & 4th Sem (Spcl.– Grammar) |
| Paper Code | SAN-403 |
| Paper Name | Laghuśabdenduśekhara– Saṃjñā & Paribhāsā |
| Title | कानिचन प्रश्नोत्तराणि |
| Content Writer | Srimanta Bhadra<br>Asst. Professor, RNLKWC.<br>Guest Faculty, Midnapore College. |

# लघुशब्देन्दुशेखरस्य संज्ञाप्रकरणस्य कानिचन प्रश्नोत्तराणि

## १. लघुशब्देन्दुशेखरोक्तदिशा सिद्धान्तकौमुद्या मङ्गलाचरणस्य व्याख्यानम्

मनोरमोमार्धदेहस्य लघुशब्देन्दुशेखराख्यस्य ग्रन्थस्य आदौ फणीशं नत्वा सिद्धान्तकौमुदीं व्याचक्षाणेन पातञ्जले महाभाष्ये कृतभूरिपरिश्रमेण आचार्येण नागेशेन सिद्धान्तकौमुद्या मङ्गलाचरणं व्याख्यातम्। 'समाप्तिकामो मङ्गलमाचरेत्' इति वचनं हृदि निधाय भगवता पाणिनिना मङ्गलार्थं वृद्धिशब्दः आदौ प्रयुक्तः, सिद्धशब्दं प्रयुक्तवता वार्तिककारेणापि ग्रन्थादौ मङ्गलम् आचरितम्, 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते' इति मङ्गलमाहात्म्यं ख्यापितवता भगवता पतञ्जलिना अथशब्देन महाभाष्ये मङ्गलं विहितम् इति स्मारं स्मारम् इमां परम्परां भट्टोजिदीक्षितेन अपि ग्रन्थादौ मङ्गलाचरणं कृतम्। आचार्यः नागेशः ग्रन्थादौ मङ्गलाचरणस्य फलं सम्यक् निरूपितवान्। तत्र मङ्गलाचरणस्य फलं भवति विघ्नध्वंसः। एवं च ग्रन्थसमाप्तेरभावः, ग्रन्थप्रचारस्य अभावः इत्यादिप्रतिबन्धकानां नाशाय ग्रन्थादौ समुचितं योग्यं मुनित्रयनमस्काररूपं मङ्गलम् आचरितवान् इति नागेशो वदति। शिष्या अपि अग्रे एवं कुर्युः इति हृदि निधाय शिष्यशिक्षार्थं ग्रन्थादौ तत् मङ्गलं निबबन्ध इति ग्रन्थे लेखनं न व्यर्थम्। ग्रन्थे लेखनाद् एव अनुषङ्गतः व्याख्यातुः श्रोतुश्च मङ्गलं जायते। अन्यफलेच्छया प्रवृत्तस्य यत्नं विना फलान्तरेण संबन्धः अनुषङ्गः। यथा आम्रफलेच्छया आरोपिताद् वृक्षाद् प्रयासं विनापि छायाप्राप्तिः। तथैव प्रकृते विघ्ननाशाय कृतस्य मङ्गलस्य प्रयासं विनापि व्याख्यातुः श्रोतुश्च मङ्गलम् इति।

**सिद्धान्तकौमुद्या मङ्गलाचरणम्**

तत्र दीक्षितविरचितः मङ्गलश्लोकः तावत्–

मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च।
वैयाकरणसिद्धान्तकौमुदीयं विरच्यते॥ इति।

अत्र त्रीन् मुनीन् पाणिनि-कात्यायन-पतञ्जलीन् नमस्करोति। अतः त्रिविधेषु मङ्गलाचरणेषु इदं नमस्कारात्मकं मङ्गलाचरणम्। 'तदुक्तीः परिभाव्य इयं वैयाकरणसिद्धान्तकौमुदी विरच्यते' इति वस्तुनिर्देशाद् इदं वस्तुनिर्देशात्मकं मङ्गलाचरणम् इत्यपि वदन्ति।

प्रकृतश्लोकस्य अन्वयार्थः तावत्– (मया भट्टोजिदीक्षितेन) मुनित्रयं - पाणिनिकात्यायनपतञ्जलीन् नमस्कृत्य– प्रणम्य तदुक्तीः – तेषां वचनानि परिभाव्य – पर्यालोच्य च इयं वैयाकरणसिद्धान्तकौमुदी विरच्यते – निर्मीयते इति।

**व्याख्यानम्**

मन्यन्ते वेदशास्त्रादितत्त्वम् अवगच्छन्ति ये ते मुनयः। मनधातोः औणादिकेन इनिप्रत्ययेन मुनिशब्दो व्युत्पद्यते। त्रयः अवयवा यस्य इति त्रयम्। मुनीनां त्रयम् इति मुनित्रयमिति षष्ठीतत्पुरुषः। मुनित्रयपदेन पाणिनि-कात्यायन-पतञ्जलयः इह गृह्यन्ते।

नमस्कृत्य इति ल्यबन्तं रूपम्। प्रणम्य इति तदर्थः। पाणिनि-कात्यायन-पतञ्जलीन् प्रणम्य इति फलितम्। ननु नमःशब्दयोगे 'नमःस्वस्तिस्वाहे'त्यादिसूत्रेण चतुर्थी विधीयते इत्यतः मुनित्रयशब्दात् चतुर्थीविभक्तिः उचिता इति चेन्न, नमःपूर्वककृधातुनिरूपितकर्मत्वात् मुनित्रयशब्दात् कर्मणि द्वितीया अपि उपतिष्ठते, तत्र च द्वितीयाचतुर्थ्योः का विभक्तिः स्यादिति प्रश्ने 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति परिभाषया उपपदविभक्तिं चतुर्थीं प्रबाध्य कारकविभक्तिः द्वितीया एव भवति इति बोध्यम्।

तेषाम् उक्तयः तदुक्तयः, ताः तदुक्तीः इति षष्ठीतत्पुरुषसमासनिष्पन्नं द्वितीयाबहुवचनान्तं पदम्। तेषां वचनानि इति तदर्थः। तच्छब्दो बुद्धिस्थपदार्थं परामृशति। प्रकृते च तत्पदेन प्राचीनाः माधववामनादयः परामृश्यन्ते।

परिपूर्वकात् णिजन्तात् भूधातोः ल्यपि परिभाव्य इति व्युत्पद्यते, तस्य च तिरस्कृत्य इत्यर्थः। एवञ्च माधवादिप्राचीनानां वचनानि मतानि तिरस्कृत्य इत्यर्थः। यद्वा सर्वनाम्नां पूर्वपरामर्शकत्वमपि प्रसिद्धम् इति प्रत्यासत्त्या तत्पदेन मुनित्रयस्य ग्रहणम्। अस्मिन् च पक्षे परिभाव्य इत्यस्य विचार्य इत्यर्थः। ततश्च मुनित्रयस्य वचनानि विचार्य इत्यर्थः फलति। ननु कोशादिप्रामाण्येन परिपूर्वकभूधातोः तिरस्कारार्थत्वमेव उचितम्, न विचारार्थकत्वम् इति चेन्न, 'परौ भुवोऽवज्ञाने' इति सूत्रे अवज्ञानग्रहणेन

धातूनामनेकार्थकत्वद्योतनात् विचारार्थकत्वे अपि न क्षतिः। यदि परिपूर्वकभूधातोः तिरस्कार एवार्थः स्यात् तर्हि अवज्ञाने इति विशेषणं व्यर्थं स्यात्, व्यभिचाराभावात्, अत एव अग्नेः उष्णः इति विशेषणं न संभवति, स्वभावतः उष्णत्वात्। तथापि भगवान् पाणिनिः यत् अवज्ञाने इति विशेषणं ददाति तस्यैतत् फलं धातवः अनेकार्था भवन्ति, तेन अर्थान्तरस्य सद्भावात् तस्मिन् अर्थे घञ् यथा न स्यात् तदर्थं विशेषणं चरितार्थम्। प्राचामुक्तीः तिरस्कृत्य इति अर्थबोधात् प्राचीनग्रन्थैः अस्य ग्रन्थस्य अगतार्थता बुध्यते, मुनित्रयवचनानि विचार्य इति अर्थग्रहात् ग्रन्थस्यास्य प्रामाणिकत्वं ध्वन्यते इति बोध्यम्।

इयमिति वैयाकरणसिद्धान्तकौमुद्या विशेषणम्। ननु–

इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपम्।

अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्॥ इति अभियुक्तवचनात् इदंशब्दस्य सन्निकृष्टार्थकत्वं बुध्यते। अर्थात् यद् वस्तु समक्षम् उपस्थितं भवति तस्य कृते इदंशब्दप्रयोगः कर्तव्यः। परन्तु मङ्गलाचरणसमये कौमुदीग्रन्थस्य अनिष्पत्तेः कथम् इयं कौमुदी इति निर्देशः सङ्गच्छते इति चेदुच्यते यत् यद्यपि ग्रन्थस्य बाह्यसत्ता नास्ति तथापि बौद्धिकी सत्ता तु अस्ति इति न दोषः। बौद्धिकीं सत्ताम् आश्रित्य च व्यवहारो भवति। यथा बन्ध्यासुतो याति इति व्यवहारः। बन्ध्यासुतस्य वास्तविकसत्ता नास्ति, तथापि बौद्धिकीं सत्ताम् आदाय कर्तृत्वम् अभ्युपगम्यते।

व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृतिप्रत्ययविभागेन शब्दा अनेन इति व्याकरणम्। व्याकरणम् अधीयते विदन्ति वा इति वैयाकरणाः, तेषां सिद्धान्ताः इति वैयाकरणसिद्धान्ताः। वैयाकरणसिद्धान्तानां कौमुदी इति वैयाकरणसिद्धान्तकौमुदी। वैयाकरणसिद्धान्तानां प्रकाशिका इति तदर्थः। कुं पृथिवीं मोदयति हर्षयतीति अर्थे चन्द्रपर्यायः कुमुदशब्दो निष्पद्यते। कुमुदस्य चन्द्रस्य इयमिति कौमुदी, तस्य अर्थः ज्योत्स्ना इति। अत्र कौमुदीपदं स्वसदृशे ग्रन्थे लाक्षणिकम्। सादृश्यप्रयोजको धर्मः – १. प्रकाशकत्वम्, २. आह्लादकत्वम्, ३. तापशामकत्वम्, ४. तापजनकत्वं च। ज्योत्स्ना यथा घटपटादीनि वस्तूनि प्रकाशयति। तथा अयं ग्रन्थः प्रकृतिप्रत्ययादिशब्दस्वरूपाणि तदर्थान् च प्रकाशयति। ज्योत्स्ना यथा सूर्यकिरणतप्तान् आह्लादयति, तप्तानां तापं च शामयति, तथा अयमपि भाष्यादिदुरूहग्रन्थरहस्यस्य अनवबोधेन तप्तान् वैयाकरणसिद्धान्तानां सुखावबोधेन आह्लादयति, तापं च शामयति। ज्योत्स्ना यथा विरहिणां चौराणां च तापं जनयति तथा अयमपि

स्थूलबुद्धीनाम् अनधीतलघुकौमुदीकोशादिग्रन्थानां सुखानवबोधेन तापं जनयति इति उक्तधर्मैः सादृश्यं स्फुटम्।

विपूर्वकाद् रच्धातोः स्वार्थे णिच्प्रत्यये कर्मवाच्ये लटि विरच्यते इति रूपं निष्पद्यते। ननु वर्तमाने लट्-लकारस्य प्रयोगो भवति, मङ्लाचरणसमये ग्रन्थस्य अनिष्पत्तेः भविष्यति रचना स्यात् इति कथं लट्-लकारः इति चेदुच्यते यत् 'वर्तमानसामीप्ये वर्तमानाद्वा' इति सूत्रेण वर्तमानसामीप्ये अपि लट्-लकारो भवति इति बोधनात् न दोषः।

सम्बन्धश्चाधिकारी च विषयश्च प्रयोजनम्।
विनानुबन्धं ग्रन्थादौ मङ्गलं न प्रशस्यते॥ इति वृद्धवचनात् ग्रन्थादौ प्रयोजनाद्यनुबन्धचतुष्टयम् अवश्यं निरूपणीयम्। अत्र कौमुदीग्रन्थे वैयाकरणसिद्धान्तो विषयः, तज्जिज्ञासुः अधिकारी, सिद्धान्तज्ञानं प्रयोजनम्, प्रतिपाद्यप्रतिपादकभावश्च सम्बन्धः इति शिवम्॥

*******

## २. "तस्मादस्यानुनासिकत्वमप्रामाणिकम्" इति पङ्क्तिं व्याख्यात।

आचार्येण नागेशन स्वविरचिते लघुशब्देन्दुशेखरे रप्रत्याहारखण्डनप्रसङ्गे इयं पङ्क्तिः लिखिता। पाणिनिव्याकरणस्य मूलं माहेश्वरसूत्राणाम् अनुबन्धाः। लाघवमस्य व्याकरणस्य वैशिष्ट्यम्। तच्च लाघवम् अणादिप्रत्याहारद्वारा सिध्यति। अणादिप्रत्याहारः च 'आदिरन्त्येन सहेता' इति सूत्रेण अन्त्येन इत्संज्ञकवर्णेन सह आद्यवर्णस्य मेलनेन सिध्यति। तत्र के इत्संज्ञकाः इति प्रश्ने दीक्षितेन सिद्धान्तकौमुद्याम् उक्तम्– 'एषामन्त्या इतः' इति। अर्थात् चतुर्दशमाहेश्वरसूत्राणाम् अन्त्यो व्यञ्जनवर्णः इत्संज्ञकः। एषाम् इत्संज्ञा च 'हलन्त्यम्' इति सूत्रेण भवति। पुनरुक्तम्– 'लण्सूत्रेऽकारश्च' इति। अर्थात् लण्सूत्रस्थः अकारः अपि इत्संज्ञकः। अनन्त्यत्वात् पृथग् उक्तिः। अस्य इत्संज्ञा च 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण भवति।

अकारस्य इत्संज्ञकत्वे रप्रत्याहारः सिध्यति। अन्त्येन इता लण्सूत्रस्थेन इत्संज्ञकसदृशेन अकारेण सह उच्चार्यमाणः आदिः रेफः मध्यगवर्णस्य लकारस्य स्वस्य रेफस्य च बोधको भवति। तदुक्तं दीक्षितेन– 'लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञ' इति।

ननु 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण अकारस्य अनुनासिकत्वे एव इत्संज्ञा स्यात्। अकारस्य अनुनासिकत्वं कथं ज्ञायते इति चेद् उच्यते यत् 'तुल्यास्यप्रयत्नं सवर्णम्' इति सूत्रस्थं कैयटवचनं प्रमाणम्। तुल्यास्यसूत्रभाष्ये ऋऌवर्णयोः मिथः सावर्ण्यस्वीकारे तवल्कारः इत्यत्रापि रपरत्वं स्यादित्याशङ्क्य लपरत्वं वक्ष्यामीति समाहितम्। अस्य भाष्यवचनस्य व्याख्यानावसरे कैयटेन रप्रत्याहाररूपेण व्याख्यास्यामि इति उक्तम्। रप्रत्याहारश्च अकारस्य अनुनासिकत्वे एव स्यादिति बोध्यम्। एवञ्च रप्रत्याहारः सिद्धः। तस्य फलं भवति तवल्कारः इत्यादौ लपरत्वसिद्धिः। तथाहि रप्रत्याहारस्वीकारात् 'उरण् रपरः' इत्यत्र 'र' भवति रप्रत्याहारः, तेन रलयोः बोधः। ततः ऋस्थाने अणादेशे रपरत्वम्, ऌस्थाने अणादेशे लपरत्वम् इति व्यवस्था भवति।

परन्तु अयं रप्रत्याहारः नागेशाय न रोचते। नागेशस्य मते लण्सूत्रस्थः अकारो नानुनासिकः। अतः अनुनासिकत्वाभावात् इत्संज्ञाभावः, इत्संज्ञाभावात् रप्रत्याहारः अपि नास्ति इति नागेशोऽभिप्रैति। अकारस्य अनुनासिकत्वस्य खण्डनाय उपात्तानि कारणानि तावत्–

१. ‘अतो ऌान्तस्य’ इति सूत्रं पाणिनिना कृतम्। तत्र रलयोः उभयोः उच्चारणं विहितम्। यदि लण्सूत्रघटकः अनुनासिकः स्यात् तर्हि रप्रत्याहारबोधकशब्दग्रहणेन रलयोः बोधो भविष्यति इति लकारग्रहणं व्यर्थम्। तथापि लकारस्य उपादानात् निश्चीयते यत् अयम् अकारः न अनुनासिकः, तेन रप्रत्याहारासिद्धेः रलयोरुपादानं सूत्रे चरितार्थम् इति।

२. लकारोच्चारणसामर्थ्यात् रप्रत्याहारः अनित्यः इति कल्प्यते, तस्य फलं ‘रषाभ्यां नो णः समानपदे’ इत्यत्र रेफेण लकारस्य न ग्रहणं, तेन कमलानाम् इत्यत्र न णत्वमिति रप्रत्याहारवादिनः वदेयुः इति अस्वारस्यं हृदि निधाय युक्त्यन्तरं दर्शयति नागेशः। यदि अकारः अनुनासिकः, तेन इत्संज्ञा स्यात् तर्हि यथा रप्रत्याहारः सिध्यति तथा लण्सूत्रस्थम् अकारं गृहीत्वा यप्रत्याहारः अपि स्यात्। ततश्च ‘इको यणचि’ इति सूत्रे यण्पदस्य स्थाने यप्रत्याहारेणैव व्यवहरेत् पाणिनिः। यत्र यत्र सूत्रेषु यप्रत्याहारेणैव कार्यं सिध्यति तत्र लाघवाय यप्रत्याहार एव ग्राह्यः आसीत् इति भावः। एवञ्च इको यणचि इत्यस्य स्थाने य इकोऽचि इति न्यासं कुर्यात्। एवमन्यत्र। तथापि पाणिनिः यण्प्रत्याहारम् आश्रित्य यद् गुरुन्यासं करोति, तेन ज्ञायते यत् नायम् अकारः अनुनासिकः इति।

३. यद्यपि सिध्यति यप्रत्याहारः तथापि ‘योऽचि’, ‘यस्य हलः’ इत्यादौ यकारस्य आहोस्वित् यप्रत्याहारस्य ग्रहणम् इत्यत्र व्याख्यानम् अपेक्षते, तच्च गौरवग्रस्तम्। अतः यप्रत्याहारः नाङ्गीक्रियते। अण्, यण् इत्यादिप्रत्याहारनिर्माणेन एव णकारानुबन्धस्य सार्थकता सिध्यति इति रप्रत्याहारवादिनः कथयेयुः इति विचिन्त्य तृतीयां युक्तिं दर्शयति नागेशः। अकारस्य अनुनासिकत्वे ‘आचारादप्रधानत्वाल्लोपश्च बलवत्तरः’ इति भाष्योक्तस्य तृतीयहेतोः अव्यापकत्वं स्यात्। लोपस्य बलवत्त्वेऽपि हल्प्रत्याहारसिद्धेः प्राग् अच्प्रत्याहारस्य असिद्धत्वात् ‘उपदेशेऽजनुनासिक इत्’ इत्यनेन इत्संज्ञैव न स्यात्, ततश्च लोपोऽपि न स्यात्, तेन हल्प्रत्याहारे लण्सूत्रस्थस्य अकारस्यापि ग्रहणं स्यात्, ततश्च प्रत्याहारेषु जातिपक्षस्यैव आश्रयणात् माम् आंस्त्रायस्व इति स्थिते आकारस्यापि हल्त्वम् आश्रित्य अनुस्वारापत्तिः स्यात्

किञ्च सोऽस्ति इत्यत्र अकारस्य हल्त्वम् आश्रित्य एतत्तदोरित्यादिसूत्रेण सुलोपापत्तिः स्यात्।

४. अकारस्य अनुनासिकत्वाभावादेव 'प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न' इति भाष्ये अज्बोधकसूत्रेषु अनुबन्धाः कथं न गृह्यन्ते इति अच्प्रत्याहारे शङ्का कृता न तु हल्प्रत्याहारे।

एवं युक्तीः प्रदर्श्य सिद्धान्तरूपेण प्रोक्तं– 'तस्मादस्यानुनासिकत्वमप्रामाणिकम्' इति। तवल्कारः इत्यादिषु लपरत्वसिध्यर्थम् 'उरण् रपरः' इत्यत्र लग्रहणमेव कर्तव्यम् इति नागेशमतिः इति शम्॥

*******

**३. हलन्त्यम् इति सूत्रव्याख्यानावसरे लघुशब्देन्दुशेखरे वर्णितम् अन्योन्याश्रयदोषपरिहारस्य पूर्वपक्षम् उपस्थापयत।**

आचार्येण नागेशभट्टेन विरचितस्य लघुशब्देन्दुशेखरस्य संज्ञाप्रकरणे हलन्त्यम् इति सूत्रव्याख्यानावसरे अन्योन्याश्रयदोषं संभाव्य पूर्वपक्षत्रयम् उपस्थाप्य दीक्षितमतम् आश्रित्य परिहारः प्रदर्शितः।

'हलन्त्यम्' इति सूत्रेण इत्संज्ञा विधीयते। तत्रेयं शङ्का उदेति यत् हल्पदेन कस्य ग्रहणम् 'हल्' इति चतुर्दशस्य माहेश्वरसूत्रस्य आहोस्वित् हल्प्रत्याहारस्य इति। यदि उच्यते चतुर्दशस्य सूत्रस्य ग्रहणं तर्हि 'न विभक्तौ तुस्माः' इति सूत्रेण तवर्गस्य सकारस्य मकारस्य इत्संज्ञानिषेधो व्यर्थः स्यात्। यतोहि तवर्गसकारादीनां अन्येन केनापि इत्संज्ञा न विहिता। अतः हल्पदेन हल्प्रत्याहारस्य ग्रहणं करणीयम्। हल्प्रत्याहारश्च 'आदिरन्त्येन सहेता' इति सूत्राधीनः। प्रत्याहारसिद्ध्यर्थं हि 'आदिरन्त्येन सहेता' इत्यस्य वाक्यार्थबोधः अपेक्ष्यते। अस्य बोधार्थं च इत्पदार्थज्ञानम् अपेक्षते। इत्पदार्थबोधश्च 'हलन्त्यम्' इति सूत्रेण यावत् इत्संज्ञा न विधीयते तावत् न ज्ञायते इति इत्पदार्थज्ञानाधीनं हल्पदार्थज्ञानम्, हल्पदार्थज्ञानाधीनम् इत्पदार्थस्य ज्ञानम्। अतः उभयमपि ज्ञानं परस्परज्ञानाधीनम् इति अन्योन्याश्रयः। अन्योन्याश्रयाणि कार्याणि च न भवन्ति। अतः अन्योन्याश्रयदोषस्य परिहारः अपेक्षते। तत्र प्रथमः पूर्वपक्षः–

'हयवरट्' इति सूत्राद् आरभ्य 'हल्' इति सूत्रपर्यन्तं दशसूत्राणाम् आवृत्तिं कुर्मः। ततः 'शषसर्' इत्यन्तानि आवृत्तानि नव सूत्राणि उद्दिश्य दशमेन आवृत्तेन 'हल्' इति सूत्रेण हल्संज्ञा विधीयते। एवम् इत्संज्ञाज्ञानं विना एव हल्पदार्थज्ञानं भवति इति नान्योन्याश्रयदोषः। परन्तु तथा सति दशसूत्राणाम् आवृत्तिः करणीया इति महद् गौरवम्।

अधुना द्वितीयः पूर्वपक्षः प्रस्तूयते। 'उपदेशेऽजनुनासिक इत्', 'हलन्त्यम्' इति सूत्रद्वयस्य स्थाने 'उपदेशे इदन्त्यम्', 'अच्', 'अनुनासिकः' इति सूत्रत्रयं करणीयम्। अस्मिन् पक्षे हल्ग्रहणं न करणीयम् इति लाघवम् अपि वर्तते। तत्र प्रथमसूत्रस्य उपदेशे अन्त्यम् इत्संज्ञकं भवति इति अर्थः कल्प्यते। अन्त्ये हल् वा भवतु अच् वा भवतु न कश्चन क्लेशः। ततः उपदेशे अन्त्यभिन्नस्य अचः इत्संज्ञा भवति इति अर्थः कल्प्यते।

यतोहि प्रथमसूत्रेण अन्त्यस्य अचः इत्संज्ञा तु विहिता एव। अतः इदम् अन्त्यभिन्नार्थम्। तत्र अन्त्यस्य अचः अनन्त्यस्य अचः इत्संज्ञायां सिद्धायाम् 'अनुनासिकः' इति तृतीयं सूत्रं नियमार्थम्। नियमाकारश्च इत्थम्– अच् चेत् इत्संज्ञकः भवति तर्हि अनुनासिक एव इति। तेन निरनुनासिकस्य अचः न इत्संज्ञा। तेन भू इत्यत्र न ऊकारस्य इत्संज्ञापत्तिः, अनुनासिकत्वाभावात्। योगविभागसामर्थ्यात् प्रथमसूत्रेण अपि इत्संज्ञा न भवति इति बोध्यम्। ननु अनुनासिकः इत् चेत् तर्हि अच् एव न हल् इति विपरीतनियमः अपि भवितुम् अर्हति इति चेत् न। तथा सति अनुनासिकस्य हलः कदापि इत्संज्ञा न स्यात्। तेन मकारस्य इत्त्वाभावात् 'मिदचोऽन्त्यात्परः' इति पाणिनेः सूत्रकरणं व्यर्थं स्यात्। एवम् अन्त्यस्य इत्संज्ञाविधानात् हल्पदार्थस्य ज्ञानम् 'आदिरन्त्येन सहेता' इति सूत्रं विनैव स्यादिति नान्योन्याश्रयः इति सर्वं सुसंगतम्। हल्ग्रहणं न करणीयम् इति लाघवात् अपाणिनीयं भविष्यति इति दोषदानम् अपि न संभवति। परं योगविभागसामर्थ्याश्रयणं, ज्ञापकस्वीकारः इत्यादिकं गौरवाय, तदपेक्षया दीक्षितमते एव लाघवात्। न केवलं वर्णानाम् अभिव्यक्तये तदुत्पादको यः कण्ठाद्यभिघातः तद्रूपमेव गौरवम् आदरणीयम्, न पुनः ज्ञानोत्पादकस्य मनसो व्यापारस्य यद् गौरवं तत् न आदरणीयम् इति राजाज्ञा अस्ति।

साम्प्रतं तृतीयः पूर्वपक्षः प्रस्तूयते। 'आदिरन्त्येन सहेता' इत्यत्र इत्पदार्थज्ञानार्थम् अन्योन्याश्रयः भवति, अतः सहेता इति अन्यथा व्याख्याय अन्योन्याश्रयं वारयितुम् उपक्रमते। तथाहि– सहेता इत्यत्र सह+इता इति न पदद्वयम् अपि तु एकं स्वतन्त्रं पदम्। कटीधातोः वीधातोः वा प्रश्लिष्टात् इधातोः तृचि एतृ, ततः आङ्योगे पररूपेऽपि एतृ इत्येव स्थिते सहशब्दयोगे 'ओमाङोश्च' इति सूत्रेण पररूपे प्रथमैकवचने सहेता इति पदं निष्पद्यते। सह आ समन्ताद् एति गच्छति इति सहेता। मध्यमवर्णो हि तदर्थः। एवं सहेता मध्यमवर्णः अन्त्यसहितादिसंज्ञकः भवति इति सूत्रार्थबोधः स्यात् इति नान्योन्याश्रयः इति चेन्न। तथा सति भाष्यकारस्य अन्योन्याश्रयदोषस्य उत्थापनं, तत्परिहारकथनं च असङ्गतं स्यात्। अतः प्रश्लिष्टात् तृच्प्रत्ययो न भवति इति ज्ञायते। किञ्च सहेता इत्यस्य योगमर्यादया मध्यमवर्णः इत्यर्थः न लभ्यते। पुनः आङः आसमन्ताद् इति अर्थः क्वापि नान्वेति इति व्यर्थम्। सहेतृशब्दो मध्यमवर्णे रूढः अपि नास्ति। अतः इदमपि अयुक्तं मतम्।

अतः 'हलन्त्यम्' इति सूत्रावृत्त्या हलः अन्त्यम् इत्यर्थं परिकल्प्य अन्त्यस्य लकारस्य इत्संज्ञां विधाय, तमाश्रित्य 'आदिरन्त्येन सहेता' इत्यनेन प्रत्याहारं निर्माय उपदेशेऽन्त्यं हल् इत् भवति इत्यर्थकस्य 'हलन्त्यम्' इति सूत्रस्य वाक्यार्थबोधः भवति इति दीक्षितपन्थाः एव ज्यायान्।

*******

**४. "अत्र केचित्–'अनुबन्धा अनेकान्ता' " – इति पङ्क्तेः तात्पर्यं स्पष्टयत।**

आचार्येण नागेशभट्टेन लघुशब्देन्दुशेखरे 'हलन्त्यम्' इति सूत्रस्य व्याखानावसरे इयं पङ्क्तिः लिखिता वर्तते। इत्संज्ञायोग्यः अनुबन्धः इति कथ्यते। तत्रायं सन्देहः यत् यस्य अनुबन्धाः आसज्यन्ते तस्य ते अवयवा अथवा अनवयवाः इति।

तत्र 'अनुबन्धा अनेकान्ता' इति केषाञ्चित् मतम्। अनुबन्धाः इत्संज्ञायोग्याः अनेकान्ताः=अनवयवाः इत्यर्थः। अनुबन्धा बोधकस्य अनवयवा भवन्ति इति यावत्। तत्र कारणं भवति यो हि अवयवः भवति विधेये स दृश्यते। यथा तिपः अवयवः इकारः स विधेये भवति इत्यादौ दृश्यते, अनुबन्धः पकारस्तु न कदापि दृश्यते इत्यतः अनुबन्धः पकारः बोधकस्य तिपः अनवयवः।

यद्येवं तर्हि तिपः पकारस्य अनुबन्धत्वम् एव न स्यात्। सत्यां हि इत्संज्ञायाम् अनुबन्धत्वम्। अत्र पकारस्य 'हलन्त्यम्' इत्यनेन इत्संज्ञा एव न स्यात्, पकारस्य अन्त्यत्वाभावात्। यस्मात् पूर्वम् अस्ति परं नास्ति तादृशः अवयवः अन्त्यः। अनुबन्धानाम् अनवयवत्वे अन्त्यत्वम् एव नास्ति। एवं जस्प्रत्ययस्य आदेः जकारस्य 'चुटू' इति सूत्रेण इत्संज्ञा न स्यात्, अनवयवत्वेन आदित्वाभावात्।

तत्रोच्यते यत् 'हलन्त्यम्' इत्यत्र अन्त्यशब्दः लक्षणया परसमीपबोधकः, तेन अनवयवत्वे अपि परसमीपस्तु अस्ति तिपः पकारः इति इत्संज्ञा भवेत्, एवम् आदिशब्दः अपि पूर्वसमीपबोधकः, तेन जसः जकारस्य अपि स्यात् इति न दोषः।

ननु अनुबन्धानाम् अनवयवत्वपक्षे 'अनेकाल्शित्सर्वस्य' इति सूत्रे शित् इत्यत्र शकारः अवयवः इद् यस्येति बहुव्रीहिसमासो न सिध्येत्। एवं मित्, टित्, कित् इत्यादौ अपि न स्यात्। यतोहि अनुबन्धः अवयवः एव न भवति।

तत्र अनुबन्धा अवयवा न भवन्ति चेदपि समीपवर्तिनः तु भवन्त्येव। ततः समीपवर्तिनि अनुबन्धे स्वनिरूपितावयवत्वम् आरोप्यते। एवम् आरोपितम् अवयवत्वम् आदाय बहुव्रीहिः स्यादिति दोषाभावः। एवं सर्वत्र आरोपितम् अवयवत्वम् आदाय दोषनिर्वाहः स्यात्। तथाहि तिपः स्थाने 'अनेकाल्शित्सर्वस्य' इति परिभाषया डा इति सर्वादेशः न स्यात्, अनुबन्धस्य डकारस्य अनवयवत्वेन अनेकाल्त्वाभावात्, परं डकारे आरोपितम् अवयवत्वम् आदाय अनेकाल्त्वं स्यात्। एवम् अन्यत्रापि बोध्यम्।

अनुबन्धानाम् अनवयवत्वपक्षे ‘उपदेशेऽजनुनासिक इत्’ इति सूत्रे उपदेशग्रहणं प्रमाणम्। तथाहि– ‘अभ्र आँ अटितः’ इत्यत्र ‘आदितश्च’ इति सूत्रेण इट्-प्रतिषेधस्य अभावः प्रयोजनम्। यदि सूत्रे उपदेशपदं न गृह्यते तर्हि सर्वस्य अनुनासिकस्य अचः इत्संज्ञा स्यात्। तथा च ‘अभ्र आँ अटितः’ इत्यत्र ‘आङोऽनुनासिकश्छन्दसि’ इति सूत्रेण आङः अनुनासिकत्वे विहिते ‘उपदेशेऽजनुनासिक इत्’ इति सूत्रेण अनुनासिकस्य अचः इत्संज्ञा स्यात्, आकारः इत्संज्ञकः अट्धातोः समीपे वर्तते, ततः तत्र अवयवत्वम् आरोप्य अट्धातुः आदित् भवति, तेन ‘आदितश्च’ इति सूत्रेण इट्-प्रतिषेधः स्यात्, स च न इष्टः। अतः उपदेशग्रहणम्। कृते उपदेशग्रहणे आङः अनुनासिकत्वेऽपि उपदेशत्वाभावात् इत्संज्ञा न स्यात्। ततश्च आदित्त्वं न सिध्यति इति इट्-प्रतिषेधो न स्यात् इति उपदेशग्रहणं चरितार्थम्।

अनुबन्धानाम् अवयवत्वपक्षे तु उपदेशपदग्रहणं व्यर्थम्। यतो हि अस्मिन् पक्षे आकारस्य इत्संज्ञायाम् अपि आङ् अट्धातोः अवयवः न भवति, ततः अट्धातुः आदित् अपि न भवति इति इट्-प्रतिषेधो न प्राप्नोति इति उपदेशपदग्रहणम् अनपेक्षितम्। एवम् अनुबन्धानाम् अनेकान्तत्वपक्षः युक्तः इति केचन प्रतिपादयन्ति। तत्र ग्रन्थकृता ‘केचित्’ इत्यनेन अस्य ग्रन्थस्य पूर्वपक्षत्वमिति ध्वनितम्। यतोहि अस्मिन् पक्षे केचन दोषाः सन्ति–

क. शित् कित् इत्यादौ बहुव्रीहिसमासार्थं स्वसमीपोच्चारिते स्वनिरूपितावयवत्वमारोप्यते इति आरोपः स्वीकार्यः भवति।

ख. तिप्, सन् इत्यादौ यदा पकारादयः अवयवाः न भवन्ति, तदा तद्घटितेभ्यः तिपः सनः इत्यादिभ्यः विभक्त्युत्पत्तिः न स्यात्।

ग. ‘हलन्त्यम्’ इत्यादौ अन्त्यशब्दस्य परसमीपे लक्षणा अङ्गीकार्या, ‘चुटू’ इत्यादौ पूर्वसमीपे लक्षणा ग्राह्या।

अतः अनन्तरम् ‘परे तु एकान्ता एव’ इत्यादिना अनुबन्धानाम् अवयवत्वपक्षः एव सिद्धान्तितः। स एव च युक्तः पक्षः इति शिवम्॥

*******